हर हर शङ्कर ॐ जय जय शङ्कर

     

श्री-वेदव्यासाय नमः

# श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
# श्री-काञ्ची-कामकोटि-पीठम्
# जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

## காரடையான் நோன்பு / Karadaiyan Nombu

५१२७ विश्वावसुः-कुम्भः ३०   १४.०३.२०२६

### Nombu Saradu – Pooja timing 7:30 PM–8:30 PM

மத்ர தேஶத்தின் ராஜாவான அஶ்வபதி குழந்தையின்மையால் கவலையுற்றார். ஒரு நாள் நாரதர் அங்கு வந்த போது, அவரிடம் தன் குறையை சொல்ல, நாரதர் ஸாவித்ரி தேவியை நினைத்து பூஜை, ஹோமங்கள் செய்தால் வழி பிறக்கும் என்று சொல்லி மறைந்தார். ராஜாவும் அவர் சொன்னபடியே செய்தார். ஸாவித்ரி தேவி அந்த ஹோமம் செய்த அக்னியிலிருந்து, தோன்றி ப்ரம்மதேவன் அனுப்பியதால் இங்கு வந்தேன். நீ செய்த தவத்திற்கு பலனாக நானே உனக்கு புத்ரியாக அவதரிப்பேன் என்று சொல்லி மறைந்தாள்.

சிறிது நாட்களுக்கப் பிறகு சொன்னபடியே அரசனின் பட்ட மஹிஷியான மாளவியின் வயிற்றில் ஸாவித்ரி தேவி பிறந்தாள். அவள் வளர்ந்து பருவ மங்கையானதும் அவளுக்கு திருமணம் செய்ய நினைத்தார்கள். அவளுடைய அழகிற்கு ஈடாக எந்த அரசகுமாரனும் இல்லை என்பதால்

वेद-धर्म-शास्त्र-परिपालन-सभा
9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

அஸ்வபதி ராஜா தன் மகளிடம் ‘நீயே உனக்கேற்றவனைக் தேர்ந்தெடுத்து வா’ என்று சொல்லி அனுப்பினார்.

ஸாவித்ரி தேவியும் தேசமெங்கும் ஆராய்ந்தும் கிடைக்காமல் இருந்த போது, நாட்டை இழந்து காட்டில் வசிக்கும் சாலுவ தேசத்து அதிபதியின் மகனான ஸத்யவானை வனத்தில் கண்டாள். தன் தந்தையிடம் வந்து தன் விருப்பத்தைத் தெரிவித்தாள். அப்போது அங்கு வந்த நாரதர் அதைக் கேட்டுக் கலங்கினார். காரணம் என்ன என்று ராஜா கேட்டதற்கு நாரதர் சொன்னார். ‘அந்த ஸத்யவான் ஒரு வருடத்தில் மரணம் அடைந்து விடுவான்’ என்று. ராஜா தன் மகளிடம் ‘நீ வேறு ஒருவரை வரித்து வா’ என்று சொன்னார். ஆனால் ஸாவித்ரியோ மனதில் ஒருவரை வரித்த பின்பு வேறு ஒருவரைத் தேடுவது தர்மமல்ல. பாதிவ்ரத்யம் கெட்டு விடும். ஆகையால் அவரையே நான் மணப்பேன் என்று உறுதியாகக் கூறிவிட்டாள்.

நாரதர் அரசனிடம், ஸாவித்ரி அவள் மன திடத்தாலே எமனையும் வெற்றி பெறுவாள் என்று சொல்ல, அரசரும் அவள் விருப்பப் படியே காட்டிற்கு சென்று சத்தியவானிடம் கன்னிகா தானம் செய்து விட்டு வந்தார். காட்டில் ஸாவித்ரி பதிவிரதா தர்மத்திற்கு ஒரு குறையும் இல்லாமல் கணவனோடு வாழ்ந்து வந்தாள். கணவனுடைய மரண தேதியை அறிந்து இருந்ததால், காமாக்ஷி தேவியை நோக்கி கடுந்தவம் இருந்தாள். அந்த பங்குனி முதல் நாள் வந்தது. கடும் நோன்பு இருந்து உணவு இல்லாமல் இருந்தாள். காட்டில் விறகு கொண்டு வர கணவனுடன் சென்றாள். விறகு பிளக்கும் போது கணவன் உயிர் துறந்தான். ஸாவித்ரி தன் கணவனின் உயிரை மீட்க சபதம் கொண்டாள். கணவனுக்கு ஈமைக்கிரியைகள் செய்ய உறவினர்கள் வந்தபோது செய்ய அவள் அனுமதிக்கவில்லை. ஸாவித்ரி தனது கணவனின் உடலுடன் காட்டில் தனியாக அவன் உயிரை மீட்க காமாட்சி தேவியை நோக்கி பூஜித்தாள். பூஜையை தொடர்ந்து நடுவே எமன் தோன்றி ‘உன்னுடைய பூஜைகள் அனைத்தும் வீண். உயிர் பிரிந்தது பிரிந்ததுதான்’ என்று சொல்லியும் அவள் தன் விரதத்தை கைவிடவில்லை. காட்டில் கிடைத்த பூக்களையும், பழங்களையும் வைத்து பூஜித்தாள். அம்மைக்கு அமுது படைக்க விரும்பினாள். காடுகளில் ஏதும்

கிடைக்காததால் அங்கே கிடைத்த களிமண்ணை அடையாகவும், கள்ளிப் பாலை வெண்ணெயாகவும் பாவித்து பூஜை செய்தாள்.

எமதர்மன், ஸத்யவான் உயிரை எடுத்துச்சென்று கொண்டிருந்தார். ஸாவித்ரி விடாமல் பின் தொடர்ந்து சென்றாள். எமன் அவளைப் பார்த்து 'என்னை ஏன் தொடருகிறாய்?' என்று கேட்க 'என் கணவன் உயிர் வேண்டும்' என்றாள். வேறு எதை வேண்டுமானாலும் கேள் தருகிறேன், என்ற எமனிடம் 'எனக்கு நூறு பிள்ளைகள் வேண்டும்' என்று வரம் கேட்க, 'தந்தேன்' என்றார். தொடர்ந்து அவரைப் பின் தொடர்ந்து உங்கள் வரம் 'பலிக்காமல் போகலாமா! கணவனில்லாமல் எப்படி உங்கள் வரம் எனக்கு பலிதமாகும்?' என்றாள். எமதேவனுக்கு அப்போது தான் ஸாவித்ரி தேவியின் மதி நுட்பம் புரிந்தது. ஸாவித்ரியின் பூஜைகளையும், மதி நுட்பத்தையும் மெச்சி உள்ளங்குளிர்ந்து, கணவனுடைய உயிரை தந்ததோடு, இழந்த ராஜ்யத்தையும் அளித்தார்.

இவ்வாறு காலனையே கதி கலங்க வைத்து போராடி வெற்றி பெற்றதற்கு, ஸாவித்ரி செய்த நோன்பு தான் காரணமாகும். அப்படி ஸாவித்ரி செய்த பூஜையே இன்று நாம் அனைவரும் செய்யும் காரடையார் நோன்பு ஆகும். மாசி முடிந்து பங்குனி தொடங்கும் சமயம் அன்றைய தினம் ஸுமங்கலிகள் பூஜை செய்தால், அவர்களுடைய கணவரைப் பிரியாமல், தீர்க்க ஸுமங்கலிகளாக இருப்பார்கள் என்பதே அந்த நோன்பின் மகத்துவம்.

காட்டில் ஸாவித்ரி படைத்த மண் அடையை வெல்ல அடையாகவும், கள்ளிப்பாலை வெண்ணெயாகவும் நாம் அன்னைக்கு படைக்கிறோம். பூஜையின்போது **"உருகாத வெண்ணெயும், ஓரடையும் நான் உனக்கு தருவேன். கணவனை பிரியாத வரம் வேண்டும்"** என்று ஸுமங்கலிகள் அனைவரும் காரடையார் நோன்பு எனும் பூஜையை செய்தால் ஸாவித்ரி போல திடமான மனதையும், கொண்ட கொள்கையில் உறுதியும் காமாட்சி அன்னையின் அருளையும் பெறுவார்கள் என்பது ஶிஷ்டர்களின் கூற்று.

**(विघ्नेश्वरपूजां कृत्वा)**

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये **विश्वावसु**-नाम-संवत्सरे **उत्तरायणे शिशिर**-ऋतौ **कुम्भ-फाल्गुन**-मासे **कृष्ण**-पक्षे **एकादश्यां** शुभतिथौ **स्थिर**वासरयुक्तायाम् **उत्तराषाढा**-नक्षत्रयुक्तायां **परिघ**-योगयुक्तायां **बव**-करणयुक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **एकादश्यां** शुभतिथौ ममोपात्त-समस्त-दुरितक्षयद्वारा श्रीपरमेश्वर-प्रीत्यर्थं कामाक्ष्याः प्रीत्यर्थं कामाक्ष्याः प्रसादेन मम दीर्घ-सौमाङ्गल्य-अवाप्त्यर्थं मम भर्तुश्च अन्योन्यप्राप्त्यर्थम् अवियोगार्थं श्रीकामाक्षी-पूजां करिष्ये।
(कलशपूजां कृत्वा)

## ध्यानम्

एकाम्रनाथ-दयितां कामाक्षीं भुवनेश्वरीम्।
ध्यायामि हृदये देवीं वाञ्छितार्थप्रदायिनीम्॥
कामाक्षीं ध्यायामि।

सर्वमङ्गल-माङ्गल्ये शिवे सर्वार्थदायिनि।
आवाहयामि कुम्भेऽस्मिन् मम माङ्गल्य-सिद्धये॥
कामाक्षीम् आवाहयामि।

कामाक्षि वरदे देवि काञ्चनेन विनिर्मितम्।
भक्त्या दास्ये स्वीकुरुष्व वरदा भव चासनम्॥
कामाक्ष्यै नमः, आसनं समर्पयामि।

गङ्गादि-सर्व-तीर्थेभ्यः नदीभ्यश्च समाहृतम्।
पाद्यं सम्प्रददे देवि गृहाण त्वं शिवप्रिये॥
कामाक्ष्यै नमः पाद्यं समर्पयामि।

कामाक्षि स्वर्ण-कलशेनाहृतं च मया शिवे।
मधुकैटभ-हन्त्रि त्वं ददाम्यर्घ्यं गृहाण भोः॥

कामाक्ष्यै नमः अर्घ्यं समर्पयामि।

आचम्यतां महादेवि एलोशीर-सुवासितम्।
ददामि तीर्थममलं गृहीत्वा लोकरक्षके॥
कामाक्ष्यै नमः आचमनीयं समर्पयामि।

मधुपर्कं मया देवि काञ्चीपुर-निवासिनि।
स्वीकृत्य दयया देहि चिरं मह्यं तु मङ्गलम्॥
कामाक्ष्यै नमः मधुपर्कं समर्पयामि।

पञ्चामृतमिदं दिव्यं पञ्चपातक-नाशनम्।
पञ्चभूतात्मके देवि पाहि स्वीकृत्य शङ्करि॥
कामाक्ष्यै नमः पञ्चामृत-स्नानं समर्पयामि।

स्नास्यतां पापनाशाय या प्रवृत्ता सुरापगा।
मयाऽर्पिता त्वं गृह्णीष्व प्रीता भव दयानिधे॥
कामाक्ष्यै नमः स्नानं समर्पयामि।

दुकूलान्यम्बराणीह वस्त्राणि विविधानि च।
ददामि हरदेवीशि विद्याधिष्ठान-पीठिके॥
कामाक्ष्यै नमः वस्त्रं समर्पयामि।

उपवीतं मया प्रीत्यै काञ्चनेन विनिर्मितम्।
गृहीत्वा तव मे भक्तिं प्रयच्छ करुणानिधे॥
कामाक्ष्यै नमः यज्ञोपवीतं समर्पयामि।

गन्धं सुवासितं रत्नं कुङ्कुमान्वितम् अम्बिके।
गङ्गानुजे देहि मह्यं दीर्घमङ्गल-सूत्रकम्॥
कामाक्ष्यै नमः गन्धान् धारयामि। हरिद्राकुङ्कुमं समर्पयामि।

कार्पास-सूत्रं दास्यामि सुवर्णमणि-संयुतम्।
भूषणार्थं मयाऽऽनीतं देहि मे वरमुत्तमम्॥
कामाक्ष्यै नमः मङ्गलसूत्रं समर्पयामि।

जातीचम्पक-पुन्नाग-केतकी-वकुलानि च।
मयाऽर्पितानि सुभगे गृहाण जननि मम॥
कामाक्ष्यै नमः पुष्पाणि समर्पयामि।

## अङ्ग-पूजा

| | |
|---|---|
| कामाक्ष्यै नमः | पादौ पूजयामि |
| कल्मषघ्न्यै नमः | गुल्फौ पूजयामि |
| विद्याप्रदायिन्यै नमः | जङ्घे पूजयामि |
| करुणामृत-सागरायै नमः | जानुनी पूजयामि |
| वरदायै नमः | ऊरू पूजयामि |
| काञ्चीनगर-वासिन्यै नमः | कटिं पूजयामि |
| कन्दर्प-जनन्यै नमः | नाभिं पूजयामि |
| पुरमथन-पुण्यकोट्यै नमः | वक्षः पूजयामि |
| महाज्ञान-दायिन्यै नमः | स्तनौ पूजयामि |
| लोकमात्रे नमः | कण्ठं पूजयामि |
| मायायै नमः | नेत्रे पूजयामि |
| मधुरवेणी-सहोदर्यै नमः | ललाटं पूजयामि |
| एकाम्र-नाथायै नमः | कर्णौ पूजयामि |
| कामकोटि-निलयायै नमः | शिरः पूजयामि |
| कामेश्वर्यै नमः | चिकुरं पूजयामि |
| कामितार्थ-दायिन्यै नमः | धम्मिल्लं पूजयामि |
| कामाक्ष्यै नमः | सर्वाण्यङ्गानि पूजयामि |

## श्री कामाक्ष्यष्टोत्तरशतनामावलिः

कालकण्ठ्यै नमः
त्रिपुरायै नमः
बालायै नमः
मायायै नमः

त्रिपुरसुन्दर्यै नमः
सुन्दर्यै नमः
सौभाग्यवत्यै नमः
क्लीङ्कार्यै नमः
सर्वमङ्गलायै नमः
ऐङ्कार्यै नमः १०
स्कन्दजनन्यै नमः
परायै नमः
पञ्चदशाक्षर्यै नमः
त्रैलोक्यमोहनाधीशायै नमः
सर्वाशापूरवल्लभायै नमः
सर्वसङ्क्षोभणाधीशायै नमः
सर्वसौभाग्यवल्लभायै नमः
सर्वार्थसाधकाधीशायै नमः
सर्वरक्षाकराधिपायै नमः
सर्वरोगहराधीशायै नमः २०
सर्वसिद्धिप्रदाधिपायै नमः
सर्वानन्दमयाधीशायै नमः
योगिनीचक्रनायिकायै नमः
भक्तानुरक्तायै नमः
रक्ताङ्ग्यै नमः
शङ्करार्धशरीरिण्यै नमः
पुष्पबाणेक्षुकोदण्डपाशाङ्कुशकरायै नमः
उज्वलायै नमः
सच्चिदानन्दलहर्यै नमः
श्रीविद्यायै नमः ३०
परमेश्वर्यै नमः
अनङ्गकुसुमोद्यानायै नमः
चक्रेश्वर्यै नमः
भुवनेश्वर्यै नमः
गुप्तायै नमः
गुप्ततरायै नमः
नित्यायै नमः
नित्यक्लिन्नायै नमः
मदद्रवायै नमः
मोहिन्यै नमः ४०
परमानन्दायै नमः
कामेश्यै नमः
तरुणीकलायै नमः
श्रीकलावत्यै नमः
भगवत्यै नमः
पद्मरागकिरीटायै नमः
रक्तवस्त्रायै नमः
रक्तभूषायै नमः
रक्तगन्धानुलेपनायै नमः
सौगन्धिकलसद्वेण्यै नमः ५०
मन्त्रिण्यै नमः
तन्त्ररूपिण्यै नमः
तत्वमय्यै नमः
सिद्धान्तपुरवासिन्यै नमः
श्रीमत्यै नमः
चिन्मय्यै नमः
देव्यै नमः
कौलिन्यै नमः
परदेवतायै नमः
कैवल्यरेखायै नमः ६०
वशिन्यै नमः
सर्वेश्वर्यै नमः
सर्वमातृकायै नमः


9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

विष्णुस्वस्रे नमः
वेदमय्यै नमः
सर्वसम्पत्प्रदायिन्यै नमः
किङ्करीभूतगीर्वाण्यै नमः
सुतवापिविनोदिन्यै नमः
मणिपूरसमासीनायै नमः
अनाहताब्जवासिन्यै नमः ७०
विशुद्धिचक्रनिलयायै नमः
आज्ञापद्मनिवासिन्यै नमः
अष्टत्रिंशत्कलामूर्त्यै नमः
सुषुम्नाद्वारमध्यकायै नमः
योगीश्वरमनोध्येयायै नमः
परब्रह्मस्वरूपिण्यै नमः
चतुर्भुजायै नमः
चन्द्रचूडायै नमः
पुराणागमरूपिण्यै नमः
ओङ्कार्यै नमः ८०
विमलायै नमः
विद्यायै नमः
पञ्चप्रणवरूपिण्यै नमः
भूतेश्वर्यै नमः
भूतमय्यै नमः
पञ्चाशत्पीठरूपिण्यै नमः
षोडान्यासमहारूपिण्यै नमः
कामाक्ष्यै नमः
दशमातृकायै नमः
आधारशक्त्यै नमः ९०
अरुणायै नमः
लक्ष्म्यै नमः
त्रिपुरभैरव्यै नमः
रहःपूजासमालोलायै नमः
रहोयन्त्रस्वरूपिण्यै नमः
त्रिकोणमध्यनिलयायै नमः
बिन्दुमण्डलवासिन्यै नमः
वसुकोणपुरावासायै नमः
दशारद्वयवासिन्यै नमः
चतुर्दशारचक्रस्थायै नमः १००
वसुपद्मनिवासिन्यै नमः
स्वराब्जपत्रनिलयायै नमः
वृत्तत्रयवासिन्यै नमः
चतुरस्रस्वरूपास्यायै नमः
नवचक्रस्वरूपिण्यै नमः
महानित्यायै नमः
विजयायै नमः
श्रीराजराजेश्वर्यै नमः १०८

एकाम्रनाथ-दयिते काञ्चीपुर-निवासिनि।
धूपं गृहाण देवि त्वं सर्वाभीष्ट-प्रदायिनि॥
कामाक्ष्यै नमः धूपम् आघ्रापयामि।

घृतवर्ति-समायुक्तं सर्वलोक-प्रकाशकम्।
दीपं गृहीष्व सुभगे वाञ्छितार्थ-प्रदायिनि॥

कामाक्ष्यै नमः दीपं सन्दर्शयामि।

गुडापूपत्रयं देवि साढकं प्रददाम्यहम्।
नवनीतयुतं देवि मोदकापूपसंयुतम्॥

पायसं सघृतं दद्यां सफलं लड्डुकान्वितम्।
मम भर्तुस्सदा देवि गृहीत्वा प्रीतिदा भव॥
कामाक्ष्यै नमः नैवेद्यं निवेदयामि।

पूगीफल-समायुक्तं नागवल्लिदलैर्युतम्।
कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥
कामाक्ष्यै नमः कर्पूरताम्बूलं निवेदयामि।

कर्पूरदीपं सुभगे सर्वमङ्गल-वर्धनम्।
सर्वव्याधिहरं देवि गृह्यताम् अम्बिके शिवे॥
कामाक्ष्यै नमः मम दीर्घसौमाङ्गल्यता-सिद्ध्यर्थं कर्पूर-नीराञ्जनं सन्दर्शयामि।

कान्ता कामदुघा करीन्द्रगमना कामारिवामाङ्कगा
कल्याणी कलितावतारसुभगा कस्तूरिकाचर्चिता।
कम्पातीररसालमूलनिलया कारुण्यकल्लोलिनी
कल्याणानि करोतु मे भगवती काञ्चीपुरीदेवता॥

मङ्गले मङ्गलाधारे माङ्गल्ये मङ्गलप्रदे।
मङ्गलाढ्ये मङ्गलेशे मङ्गलं देहि मे भवे॥

नमो देव्यै महादेव्यै लोकमात्रे नमो नमः।
शिवायै शिवरूपिण्यै भक्ताभीष्टप्रदा भव॥

कामाक्षि काञ्चिनिलये मम माङ्गल्यवृद्धये।
नमस्करोमि देवेशि मह्यं कुरु दयां शिवे॥
कामाक्ष्यै नमः अनन्तकोटि-प्रदक्षिण-नमस्कारान् समर्पयामि।
कामाक्षी स्वरूपस्य ब्राह्मणस्य इदमासनम् --- सकलाराधनैः स्वर्चितम्

कामाक्षी काम-वृद्ध्यर्थं मम माङ्गल्य-सिद्धये।
उपायनं प्रदास्यामि ददामोघं वरं मम॥

इदं हिरण्यं सदक्षिणाकं सताम्बूलं कामाक्षी-स्वरूपाय ब्राह्मणाय सम्प्रददे न मम॥

While tying the saradu one should recite the following shlokam

दोरं गृह्णामि सुभगे सहारिद्रं धराम्यहम्।
भर्तुरायुष्य-सिद्ध्यर्थं सुप्रीता भव सर्वदा॥

❁

# श्री-कामाक्षी-चूर्णिका

श्री-चन्द्र-मौलीश्वराय नमः। श्री-कामाक्षी-देव्यै नमः।
जय जय श्री-काम-गिरीन्द्र-निलये!
जय जय श्री-कामकोटि-पीठ-स्थिते!
जय जय श्री-त्रिचत्वारिंशत्-कोण-श्रीचक्रान्तराल-बिन्दु-पीठोपरि-लसत्-पञ्च-ब्रह्म-मय-मञ्च-मध्य-स्थ-श्री-शिव-कामेश-वामाङ्क-निलये!
जय जय श्री-विधि-हरि-हर-सुर-गण-वन्दित-चरणारविन्द-युगले!
जय जय श्री-रमा-वाणीन्द्राणी-प्रमुख-रमणी-कर-कमल-समर्पित-चरण-कमले!
जय जय श्री-निखिल-निगमागम-सकल-संवेद्यमान-विविध-वस्त्रालङ्कृत- हेम-निर्मित-अनर्घ-भूषण-भूषित-दिव्य-मूर्ते!
जय जय श्रीमद्-अनवरताभिषेक-धूप-दीप-नैवेद्यादि-नाना-विधोपचारैः परिशोभिते!
जय जय श्री-काञ्ची-नगर्यां द्वात्रिंशद्-धर्म-प्रतिपादनार्थ-स्थापित-हेम-ध्वजालङ्कृते!
जय जय श्री-सकल-मन्त्र-तन्त्र-यन्त्र-मय-परा-बिलाकाश-स्वरूपे!
जय जय श्री-काञ्ची-नगर्यां कामाक्षीति प्रख्यात-नामाङ्किते!
जय जय श्री-महात्रिपुरसुन्दरि बहु पराक्!

शुभम्॥